Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# चातुर्वर्ण्य मया सृष्टं गुणकर्म विभागशः

डॉ .मुकेश कुमार डागरः
(धर्माचार्यः) प्राचार्य,
सिद्धि विनायक कॉलेज,
,(सीकर)| राजस्थान,भारत।



---

**सारांशः**– भगवदनुग्रहेण अनन्तानन्त ब्रह्माण्ड नायकस्य परमात्मपुरुषस्य भगवतः श्रीरामस्य दासानुदासस्य स्वनाम धन्यस्यानन्त श्री विभूषितस्य नारायणदासमहाराजस्य व्यक्तित्वं प्रदर्शितवान्। अत्र कियान् दोषः कश्च गुण: नाहं जाने।

**मुख्यशब्दः**– चातुर्वर्ण्य, सृष्टं ,गुणकर्म, विभागशः

वर्णाश्रमविषये विचारः– वैदिकवाङ्मये वर्णाश्रमव्यवस्थायाः मूलं तत्वं ऋषिभिः संकलितम्। ऋग्वेदात् वर्णाश्रमस्यावस्थितिः श्रूयते । प्रसिद्ध पुरुष सूक्ते मन्त्रः स्मर्यते यत्

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।

मुखं किमस्य कौ बाहू का उरू पादा उच्यते॥

ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।

ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥[1]

उपर्युक्तस्य मन्त्रद्वयस्य व्याख्याने सायणः प्राह -

प्रश्नोत्तररूपेण ब्राह्मणादिसृष्टिं वक्तुं ब्रह्मवादिनां प्रश्ना उच्यन्ते । प्रजापते: प्राणरूपादेवाः यत् यदा पुरुषं विरारूपं व्यदधुः कल्पेनोत्पादितवन्तः तदानीं कतिधा कतिभिः प्रकारैः व्यकल्पयन् विविधं कल्पितवन्तः। अस्य पुरुषस्य मुखं किम् आसीत् कौ बाहू अभूताम् । का ऊरु। कौ च पादावुच्येते प्रथमं सामान्यरूप: प्रश्न: पश्चात् मुखं किम् इत्यादिना विशेषविषयाः प्रश्नाः।

इदानीं पूर्वोक्तानां प्रश्नानामुत्तराणि वर्णयति। अस्य प्रजापतेः ब्राह्मणः बाह्मणत्वजातिविशिष्टः पुरुषः मुखमासीत् मुखादुत्पन्न इत्यर्थः। योऽयं राजन्यः क्षत्रियत्वजातिमान् पुरुषः सः बाहूकृतः बाहुत्वेन निष्पादितः। बाहुभ्यामुत्पन्न इत्यर्थः । तत् तदानीम् अस्य प्रजापतेः यत् वैश्यः संपन्नः। ऊरूभ्यामुत्पन्न इत्यर्थः। तथास्य पद्भ्यां पादाभ्यां शूद्रः शूद्रत्वजातिमान् पुरुप: अजायता "इयं च मुखादिभ्यो ब्राह्मणादीनामुत्पत्तिर्यजुः संहितायां सप्तकाण्डे स मुखतस्त्रिवृत्तं निरमिमीतेत्यादौ[2]' इत्यादौ विस्पष्टमाम्नाता।

अस्यामचि चतण्णां वर्णानां किंवाजातीनां स्पष्टोल्लेखः प्राप्यते । साम्प्रतिक इतिहास ग्रन्थे च वर्णविभागस्योपक्रमः समर्थितः। अत्राहं यथाग्रन्थे वर्णव्यवस्थायाः उल्लेखः प्राप्यते तथैव वर्णयामि। वर्णव्यवस्था राष्ट्रस्य कृते हिताय वर्तते अथवा दुःखाय वतते तदहं न वक्ष्यामि। यद्यपि वर्तमानकाले वर्णव्यवस्थायाः यादृशः कुप्रचारः समाजस्य विखण्डनाय शत्रुभाववर्धनाय सुखशान्ति विच्छेदनाय च भवति निश्चितमेवायं संक्रमणकाल: प्रतीयते।

भगवान् वेदः साक्षात् वर्णव्यवस्थां समर्थयामास स्फुटशब्दैश्च वर्णयामास । पुराणादिषु च एतस्य बीजस्य विकासो दृश्यते किंतु इदानींतनाः स्वार्थलोलुपाः स्वाध्याय ज्ञानविज्ञानहीनाः खलाः मिथ्यावादं प्रसारयन्ति। यत्र कुत्रापि विभागः दृश्यते स विभागः सर्वथा विकासाय सुखाय शान्तये समृध्यै च भवति। यथा राष्ट्रे प्रदेश विभागः राष्टस्य समुन्नत्यै कृतः न तु विभक्तः प्रदेशः राष्ट्रात् बहिर्भूतः सर्वथा स्वतन्त्रो जायते। राज्येषु राष्ट्रस्य अनुशासनं भवति। एवं प्रकारेण राज्यस्य राष्ट्रस्य च समुन्नतिरवलोक्यते। यथा वर्णविभागः, वाङ्मयेषु (अक्षरेष) दश्यते तस्य विभागस्य व्यवहारे सिद्धान्ते च महत्त्वं ऋषिभिरङ्गीकृतम्। त्रिषष्टि वर्णाः चतःषष्टियं वर्णाः याज्ञवल्यक्यपाणिनीभ्यां च समर्थिताः। केचन स्वर वणाः, कचन व्यञ्जनवर्णाः, स्पर्शवर्णाः, अन्तस्थवर्णाः, अयोगवाहाश्च भवन्ति किन्त अध्ययनपरम्परायां एतेषां विभागानां ज्ञानं आवश्यकम अन्यथा पदे पदे उच्चारणे अर्थसम्पादने, लेखने च दोषाणामाविर्भावः स्यात्। अयं भावः समाजे या वर्णव्यवस्था राराजते तत्रापि कश्चिद्धेतु : स्यादेव। भगवान् श्रीकृष्ण: गीतायां प्राह –

चातुर्वर्ण्य मया सृष्टं गुणकर्मविभागशः।

तस्यकर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥[3]

अयमर्थः संसारे ये चत्वारो वर्णाः प्रसिद्धाः ब्राह्मण-क्षत्रिय-वैश्य-शूद्राश्च तेषां चतुर्णाँ वर्णानामुत्पादकः सर्जक: साक्षात् श्रीकृष्णः अनादिनिधनोवर्तते। अत्रेदं ध्येयं वर्णानां विभागे गुणानां सत्वरजतमसां कर्मणां च प्रामुख्यं भवति। सत्वादि त्रिभिः गुणैः विभक्तोऽयं समाजः।

वर्णविभागे गुणानां ज्ञानमावश्यकम्। यत् कर्म वर्तते तदपि गुणमूलकमेव। गुणैः प्रेरितः जनः स्वाध्याये, आलस्ये भोगे, चौर्य कर्मणिः च विनियुक्तो जायते अत: गुणस्य ज्ञानं विना वर्णव्यवस्थायाः सम्यक् ज्ञानं निरर्थकमेव प्रतीयते।

वेदस्याध्ययनेन ज्ञायते विराट्पुरुषस्य शरीरावयवात् ब्राह्मणादीनां समुत्पत्तिः। समाजे शूद्रस्य यथा तिरस्कारः दृश्यते नास्ति वैदिक कालीना व्यवस्था यतोहि 'पद्भ्यां शूद्रो अजायत' अर्थात् परमात्मपुरुषस्य चरणाभ्यां शूद्रत्व जातिविशिष्टः उत्पन्नः। परमेश्वरस्य पादारविन्दात् त्रैलोक्यपावनीगंगा उत्पन्ना कोटिशः जनाः स्नात्वा, पीत्वा च पापान्मुच्युन्ते किं पुनः मृतानामपि समुद्धाराय गंगायाः दिव्यं जलमुपयुज्यते। भारते देशे प्रतिदिनं श्राद्धादिकाक्रिया गंगायाः जलेन सम्पद्यते किं तस्य पुरुषस्य चरणाभ्यां उत्पन्नः शूद्रत्वजातिविशिष्टः तिरस्कारयोग्योऽस्ति। अवश्यमेव सर्वतो भावेन शूद्रः वन्द्यः भवति। समाजे यः भ्रमः प्रचारितो भवति स आलस्य पुरस्कृतानां पुरुषाणां दुष्टानाञ्च दुष्प्रचारः। यावत् कालं समाजे अशिक्षायाः वर्चस्वं विद्यते तावदेव चाटुकाराणां भेदनीतिः चलति । सम्प्रति समाजे शिक्षायाः प्रचारः जातः तथाकथिताः शूद्राश्च शिक्षिताः जाता: अतः स भेदभावः शनैः शनैः विनष्टो भवति।

श्रीमद्भगवद्गीतायां चतुर्णां वर्णानां पृथक् पृथक् कर्म प्रस्तावितम्। शास्त्रस्य केचन स्वार्थसाधकाः जटाभिस्तापसाः खलाः अन्यथा व्याख्यानं कुर्वन्ति तेषां मते ब्राह्मणादीनां व्यवस्था मिथ्याचारात् प्रेरिता वर्तते। गीतायां यथा प्रोक्तं -

ब्राह्मणक्षत्रियविशां शूद्राणां च परं तप।

कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥[4]

अयं भावः ब्राह्मणादीनां स्वभावतः उत्पन्नाः गुणाः कर्मसु अधिकृताः मन्यन्ते। कर्माणि परिवर्तनशीलो मन्यते सर्वदा एकैव गुणः दृढो नैव जायते कालभदन गुणो भिद्यते तस्मात् सात्विकोऽपि जनः देशकालपरिवर्तनेन कदाचित रजोगुणात्मको भूत्वा तादृशं कर्म करोति। गुणानां लक्षणं प्रत्यक्षतो द्रष्टुं शक्यते। मनुष्यस्य कार्यं कर्म चावलोक्य निश्चेतुं शक्यते यद् अस्मिन् मनुष्ये सम्प्रति कस्य गुणस्य प्राबल्यं वर्तते। गुणानां परिवर्तनं च शास्त्रोदृष्टोपायेषु प्राप्यते। अर्थात् सत्वगुणस्य शरीरे समृद्धिः केन प्रकारेण स्यात् इत्यस्य बहुधा चिन्तनं ग्रन्थेषु श्रूयते। यद्यपि एकस्मिन्नेव काले त्रयोगुणाः वसन्ति तथापि तेषु त्रिषु कस्य बलाबलं वर्तते तेनैव कार्यसिद्धिः जायते। सत्वगुणस्य प्रभावात् कर्म निर्मलं भवति ध्यानस्य योग्यता प्रवर्द्धते। तमोगुणस्य प्राब्ल्यं यदि स्यात् आलस्यं वर्द्धते
प्रमादस्याभिवद्धिः भवति तथा गुणाधीनो भूत्वा स तादृशं कर्म करोति। इदानीं गीतोक्तं ब्राह्मणस्यकर्म विचार्यते -

शमोदमस्तपः शौचं क्षान्तिरार्जवमेव च।

ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम्॥

शौर्यं तेजो घृतिर्दाक्ष्यं युद्धे चाप्यपलायनम्।

दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम्॥

कृषिगौरक्ष्यवाणिज्यं वैश्यकस्वभावजम्।

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥[5]

एतेषु लोकेषु वर्णानां धर्मः व्यवसायश्च प्रकृष्टेन प्रतिपादितः। शास्त्रं कदाचिदपि गर्हितं नास्ति अपितु यो हि अल्पज्ञः स्वार्थवशात् शास्त्रस्य निषिद्धं व्याख्यानं कृत्वा सर्वान् मुह्यति । स्वयं पथभ्रष्टः अपरानपि गर्ने पातयति।

महाराजस्य श्रीनारायणदासस्य कथनं वर्तते शास्त्रं सर्वत्र प्रमाणभूतं कथ्यते। शास्त्रं विना कः निर्णायकः स्यात्। यदि वर्णव्यवस्थाया त्रुटिपूर्णः, दोषयुतः, विध्वंसकश्च वर्तते तर्हि समग्रे भारते वर्षे एकस्वरेण वर्णव्यवस्थायाः स्थापनं कथं विद्यते। यदि अंधविश्वासः अस्ति तर्हि सर्वत्र कथं दृश्यते। अवश्यमेव कश्चित् विशिष्ट : हेतुः अस्यां व्यवस्थायां ज्ञायते।

इदमपि सत्यं वर्तते कदाचित् स हेतुः दृष्टि गोचरो जायते कदाचिच्च परोक्षे भवति समाजे वर्तमानकाले यो हि उन्मादः दृश्यते तत्र दोषो वर्तते स्वार्थसाधनाय नेतारः समाजस्य सामरस्यं नाशयंति तथा वैमनस्यं प्रसारयंति। इदानीं ये धर्माचार्याः विद्यन्ते तेऽपि प्रायेण सिद्धान्तविहीनाः सन्ति सामाजिकैः सह तेषां साक्षात् संवादः नैव जायते। ते चाकचक्यमये भौतिके जीवने रताः सन्ति । किन्तु नारायणदास महाराजस्याश्रमे अद्यापि ग्राम्याः मुक्तभावेन समस्यानां समाधानं कारयन्ति। महाराजः एकैकस्य समस्यां गाम्भीर्येण शृणोति तथा तस्याः

समाधानं ज्ञापयति । महाराजस्य मते यदि भारत राष्ट्रस्य धर्माचार्याः सामाजिकानां हिताय कार्यं करिष्यन्ति अवश्यमेव असंतोषस्य, भ्रष्टाचारस्य, आतंकवादस्य च स्वल्पेनैव कालेन विनाशो भवेत्। किं तु दौर्भाग्यात् मठादीनां निर्माणं कृत्वा धर्माचार्याः नै कर्तव्यं पूरयन्ति। जगद्गुरु रामानन्दाचार्यः समाजस्य, देशस्य च दुर्दशां विलोक्य समग्रे भारतेदेशे शान्तिं प्रदर्शयामास। श्री रामानन्दस्य हितकरं वचनं सर्वे ब्राह्मण क्षत्रिय-वैश्य-शूद्राः अन्त्यजाः, म्लेच्छाश्च यवनादयः शृण्वन्ति स्म। तस्मात् धर्माचार्याणां परमं कर्त्तव्यं वर्तते राष्ट्रस्य समुन्नत्यै जीवनदानम्। महाराजस्य वर्णव्यवस्थायां दिव्यदृष्टिः वर्तते। एकत्र उत्सवेषु सर्वे वर्णाः एकत्रैव एकस्यां पंक्तौ उपविश्य भोजनादिकं कुर्वन्ति। परिवेषणकर्तारः केचन शूद्रा अपि भवन्ति किंतु वैष्णवी दीक्षां सर्वे गृहीतवन्तः। महाराजस्याश्रमे तुच्छविचारस्य आग्रहः नैव श्रूयते।

अपरत्र वेदविद्यायाः संरक्षकः महाराजः तत्रैव द्विजबन्धूनामुपकाराय वेदविद्यां संरक्षणाय च वेदविद्यालयं चालयति। यस्मिन् वेदविद्यालये ब्राह्मणवटूनामेव प्रवेशाधिकारः सुनिश्चतः। महाराजः वैदिककर्मकाण्डस्य पोषको विभाति। भक्तिसंप्रदाये वर्णव्यवस्थायाः तथाविधं प्रयोजनं नास्ति तथापि वैदिक व्यवहारस्याधारस्तंभः वर्णव्यवस्था वर्तते। सम्पूर्णे भारते "अस्य नियमस्य परिपालनं भवति । यद्यपि लोकेऽस्मिन् भ्रमो वर्तते विदेशे वर्णव्यवस्थायाः स्थानं नास्ति किन्तु सर्वत्र इस्लाम मध्ये क्रिश्चन मध्ये च जातीयवादः द्रष्टुं शक्यते। उत्तमाधमः तत्रापि विद्यते। इदं सर्वकालिकं सत्यमस्ति वर्णव्यवस्था समाजस्य समुन्नत्यै, विकासाय, गौरवाय चासीत् किन्तु शनैः शनैः प्राचीना व्यवस्था विखण्डिता जाता। फलतः समाजे प्रीतिर्नास्ति।

पुराणादौ वर्णव्यवस्था विषये गंभीरं चिन्तनं समुपलभ्यते। श्रीमद्भागवते ब्राह्मणत्व प्राप्तये कानिचिद् कर्माणि प्रशस्तानि सन्ति। कर्म कृत्वा जनः उत्तमजातौ जन्मगृह्णाति । तत्रैव कुत्सितं कर्म कृत्वा ब्रह्मणाच्युतो जायते। अनेके क्षत्रिय राजानः कर्मणा ब्राह्मणत्वमवापुः।

श्रीमद्भागवतस्य द्वादशस्कन्धे एका कथा वर्तते। एकदा भगवान् श्रीकृष्ण अत्रि-असित-कण्व-परशुराम-व्यासादिभिः साकं श्रुतदेवस्य गृहमाजगाम आगत्य च प्रोवाच - ब्राह्मण: जन्मत एव प्राणिनां मध्ये श्रेष्ठः अत एव हे श्रतदेव! इमे महर्षयः ममात्मरूपाः एतेषां ब्राह्मणानां पूजनमात्रेणाहं पूजितोस्मि।

द्वादशस्कन्धे मार्कण्डेयस्य कथा पठ्यते भगवान् शंकरः मार्कण्डेयं प्रोक्तवान् ब्राह्मण: चित्तस्यैकाग्रेण, तपसा, स्वाध्यायेन धारणाध्यानसमाधिभिश्च वेदमयं वपुः धारयति एतस्मादेव ब्राह्मणाः पूज्याः स्तुत्याश्च सन्ति।

महाभारते वनपर्वणि नहुषस्य कथा वर्तते शताधिकमश्वमेधं कृत्वा नहुषः इन्द्रपदमवाप। पदं प्राप्यासौ मदोन्मतो भूत्वा इन्द्राणीमकामयत्। स्वशीलरक्षणाय सा शची देवगुरु बृहस्पतिं प्राप। अगस्त्य शापात् स सर्पो भूत्वा वनमध्ये जगाम। स अजगर: महान् सर्पो भूत्वा शापस्य विमुक्त्यर्थं प्रतीक्षां चक्रे । शाप विमुक्त्यर्थं सप्तर्षयः ऊचुः - यदा कश्चित् ज्ञानी ब्राह्मणस्य शास्त्रीयं व्याख्यानं कृत्वा त्वां तर्पयिष्यति तदा सर्पशरीरात् तव मुक्तिर्भविता।

इदानीं समग्रे भूभागे ब्राह्मणस्य ज्ञाता नास्ति कोऽपि द्वापरान्ते तव कुले महाराजः युधिष्ठिरः वनवासकाले ब्राह्मणस्य यथार्थं व्याख्यानं करिष्यति तेन तव मोक्ष: स्यात् । इदं सर्पशरीरं तावत् काल पर्यन्तं त्वं धारय। दिनस्य चतुर्थे प्रहरे यः कश्चित् तव क्षेत्रे आगन्ता स बलिष्ठश्च तव आहाररूपेण भविता। स नहुषः अजगरो भूत्वा जीवनं यापयति स्म। बलवान् भीमः वनवासवेलायां आखेटं कर्म करोति स्म। एकदा स

सर्पः भीमं दूरादेव प्रबोधयामास इदं क्षेत्रं ममास्ति दूरात् एव सर्वं कार्यं कुरु नोचेत् अहं त्वां खादयिष्यामि। सर्पस्य वचनं श्रुत्वा क्रुद्धो भीमः बलहीनो जातः। भीममन्वेषमानः युधिष्ठिरः तत्राजगाम। सर्पणाक्रान्तः भीमः निश्चेष्टः मृतप्राय इवाभवत्। युधिष्ठिरः सर्पस्य कथां श्रुत्वा विह्वलो जातः।

युधिष्ठिरः सर्प निवेदयामास यावत् कालं वयं वनवासे स्मः तावत् त्वां प्रतिदिनं भोजनं दास्यामः। किन्तु शापबलात् स सर्पः प्रोवाच भीमं परित्यज्य अद्य द्वितीयमाहारं नैव करिष्ये।

युधिष्ठिरः उक्तवान् ब्राह्मणस्य महिमा त्वया न ज्ञातः कथं ब्राह्मणानां तिरस्कारं चकार।

ब्राह्मणस्य नाम श्रुत्वा सर्पः पूर्वजन्मस्य सकलं वृत्तान्तं संस्मारयामास। झटिति जिज्ञासां कृतवान् ब्राह्मणः कः अस्ति तथा ब्राह्मणानां किं कर्म भवेत्?

'ब्राह्मणः को भवेद् राजन् वेद्यं किं च युधिष्ठिर।

ब्रवीह्यमितितिं त्वां हि वाक्यैरनुमीमहे ॥

सत्यं दानं क्षमा शीलमानृशंस्यं तपो दया।

दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः॥

शूद्रेष्वपि च सत्यं च दानमक्रोध एव च।

आनृशंस्यमहिंसा च दया चैव युधिष्ठिर ॥

न वै शूद्रो भवेल्लक्ष्यं द्विजे तच्च न विद्यते।

यत्रै तल्लक्ष्यते सर्प वृत्तं स ब्राह्मणः स्मृतः॥

यत्रै तन्न भवेत् सर्प तं शूद्रमिति निर्दिशेत् ॥ [6]

युधिष्ठिरस्य ज्ञानमयमुपदेशं श्रुत्वा स सर्पदेहात विमुक्तोभवत्। महाभारतस्य यक्षप्रश्ने अस्यैवाशयस्य पोषण वर्तते । य: युधिष्ठिर पप्रच्छ

राजन् कुलेन वत्तेन स्वाध्यायेन नुतेन वा।

जाहाण्य केन भवति प्रबहोतत् सुनिश्चितम्॥

श्रुणु यक्ष कुलं तात न स्वाध्यायो न च श्रुतम्॥

कारणं हि द्विजत्वे च वृत्तमेव न संशयः॥[7]

अर्थात् जन्ममात्रेण कथित् ब्राहाणो न मान्यते। तत्रैव एकः श्लोकः प्राप्यते -

पाठका: पाठकाचैव ये चान्ये शास्त्रचिन्तकाः।

सर्वे व्यसनिनो मूर्यो य क्रियावान् स पण्डितः ॥

चतुर्वेदोऽपि दुर्वृत्तः स शूदादतिरिच्यते ।

योऽग्निहोत्र परो दान्तः स ब्राहाण इति स्मृतः ।।

कर्मणां वैशिष्ट्यं भवत्येव। मनुष्यशरीरं प्राप्य सर्वदा लोकोपकारकं कर्म विधेयम्। कर्म प्रमुखं मन्यते। लोकानां कल्याणं येन कर्मविशिष्टेन भवेत् तदेव कर्तव्यम्। कर्मवादस्य व्याख्यानं शास्त्रेषु सर्वत्र पठ्यते। आचरणस्य प्रामुख्यं समाजे भवति। ब्राह्मणस्य शरीरं मदान्धाय न भवति अपितु अध्यात्म जीवनाय मन्यते। अध्यात्म कर्म विधेयम्। आत्मकल्याणेन सह समाजस्य कल्याणं तत्रेष्टं मन्यते । दयादाक्षिण्यादि गुणानां संकलनं विधेयम्।

## राष्ट्ररक्षण दृष्टिः

वेदानामध्ययनेन प्राप्यते वेदकालेऽपि सम्यक् राष्ट्रस्य चिन्तनमासीत् । वेदे राष्ट्रशब्दः पठितः। यजुर्वेदे अनेकत्र राष्ट्रशब्दः समागत: तद्यथा -

वयं राष्ट्र जागृयाम पुरोहिताः [8]

राष्ट्रदा राष्ट्रम्मे देहि स्वाहा[9]

अथर्ववेदे च -

त्वं राष्ट्राणि रक्षसि[10]

राष्ट्रस्य रक्षणं नागरिकानां दायित्वं कर्त्तव्यं च भवति । यस्मिन् कस्मिन् देशे यः वसति तस्य मूलं कर्त्तव्यं विद्यते राष्ट्र रक्षणाम् राष्ट्ररक्षणम् नाम आत्मरक्षणम्, गौरव रक्षणम्, स्वाभिमानस्य रक्षणम् राष्ट्र केवलं भूमेः खण्डमात्रं नास्ति प्रत्युत सर्वस्वं भवति । यस्य पुरुषस्य राष्ट्रगौरवं प्रति श्रद्धा न विद्यते स खलु मृतप्राय एव । अथर्ववेदे राष्ट्ररक्षण विषये संकेत: उपलभ्यते तद्यथा -

"देशोपसर्गा शमु नो भवन्तु"[11]

अयंभाव: देशोपरि यत् संकटमापतति तस्मात् संकटात् देशस्य रक्षणं विधेयम्।

यजुर्वेदस्य राष्ट्रचिन्तनं समग्रं प्रतिभाति राष्ट्र त्रयो गुणाः भवेयुः -

१. राष्ट्र स्वतन्त्रं भवेत्।

२. राष्ट्रं जनानां कल्याणाय भवेत्।

३. राष्ट्र समग्रस्य विश्वस्य हितसाधनाय कार्यं कुर्यात् ।

इमे त्रयोऽपि आशयाः यजुर्वेदस्य दशमे अध्याये पठिताः -

"स्वराजस्थ जनभृतस्थ विश्वभृतस्थ राष्ट्रदा राष्ट्रं मे दत्त"[12]

समग्रराष्ट्रस्य चिन्तनं शुक्लयजुर्वेदस्थ प्रसिद्ध मन्त्रे विभाति -

"आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्र राजन्यः शूर इषव्योऽतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषां जिष्णूरथेष्ठाः सभेयो युवास्य यजमानस्य वीरो जायतां निकामे निकामेनः पर्जन्यो वर्षतु फलवत्यो न ऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्"[13]

उपर्युक्तः यजुर्मन्त्रः सर्वगुण सम्पन्नस्य आदर्शराष्ट्रस्य स्वरूपं प्रकल्पयति । यस्मिन् राष्ट्रे सर्वे वर्णाः भवेयुः तथा स्वकीयं कार्यं च कुर्युः। राष्ट्ररक्षणाय प्रथम सूत्रं वर्तते स्वकीयस्य कार्यस्य सर्वतोपायेन संपादनम्। सबलं राष्ट्र दुर्बलं च राष्ट्र राष्ट्रस्थजनानां कार्यशैल्या भवति। इदानीं किं भवति स्वकीयस्य परिगृहीतस्य कर्मणः सम्यक् परिपालनं न भवति।

कार्यसंस्कृतिः प्रायेण नष्टभ्रष्टा प्रतिभाति। अन्यस्य कार्यस्य समीक्षणं दृश्यते।

अयमत्र विशेष : राष्ट्ररक्षणस्य प्रथमं सोपानं गृहरक्षणम् मन्यते।

गृहे अनुशासनस्य दाढ्येण परिपालनं भवेत्।।

आचारस्य, नैतिकशिक्षायाः ज्ञानं बाल्यकालादेव देयम्।

लाभस्य संवरणम्।

आवश्यकतायाः न्यूनीकरणम्।

परद्रव्याणि लोष्टवत् । इत्यस्य व्यवहारे परिपालनम्।

अध्यात्मविद्यायाः प्रचारः।

त्यागमयस्य जीवनस्योपदेशः।

निर्धनानां, दुर्बलानाच संरक्षणम्।

स्त्री-बाल-वृद्धानाञ्च सम्माननम्।

पशुपक्षीणाञ्च संरक्षणम्।

शिक्षाया: विकासः।

राष्ट्रवादस्य काले काले प्रचारः।

स्वतन्त्रता दिवसस्य, गणतन्त्रदिवसस्य च सामान्य जनेषु प्रचारः।

राष्ट्रियमहत्त्वस्य चलचित्राणां दूरदर्शन माध्यमेन प्रचारः।

स्वातन्त्र्यान्दोलने मृतानां वीरपुरुषाणां गाथा गानम्।

राष्ट्रिय सम्पत्तेः संरक्षणम्।

ध्वजोत्तोलनस्य, राष्ट्रगानस्य, राष्ट्रगीतस्य च महत्त्व प्रतिपादनम्।

उपर्युक्ताः केचन लौकिकोपायाः प्रदर्शिताः वेदे राष्ट्रे रक्षण विषये द्विधा उपायः कथितः।

प्रथमस्तावत् - तपः अर्थात् अनुशासनम् द्वितीयः - दीक्षा अर्थात् समपर्णम्।

द्वाभ्यामुपायाभ्यां राष्ट्र समुन्नतिं लभते।

तपो नाम आत्मानुशासनम् । मन्त्रः यथा -

"भद्रमिच्छन्त ऋषयः स्वर्विदस्तपो

दीक्षामुपनिषेदुरग्रे।

ततो राष्ट्र बलमोजस्य जातं

तदस्मै देवा उपसंनमन्तु ॥[14]

राष्ट्रस्य संरक्षणं सर्वेषां कार्यं विद्यते। राष्ट्रं सदा राष्ट्रीयानां भवति तस्मात् शासकवर्गस्य तथा सामान्यजनस्य च दायित्वं वर्तते राष्ट्रस्य रक्षणं कुर्यात्। धर्मशास्त्रेषु राष्ट्रद्रोहस्य कृते दण्डविधानं पठितम्। अक्षम्यापराधस्य कृते राज्य त्यागोऽपि विहितः। इदानीमपि समग्रे विषये इयं व्यवस्था परिपाल्यते।

राष्ट्रद्रोहस्य कृते प्राणदण्डस्यच विधानमपि प्राप्यते शतपथब्राह्मणे राजा शपथग्रहण पूर्वकं वक्ति यदि राष्ट्र प्रति मम व्यवहारः अनुचितः स्यात् राष्ट्रस्य दुर्बलाय च भवेत् मम सकलं पुण्यं आजन्मार्जितं विनश्येत्।

यथा -

"यां च रात्रिमजायेऽहं यां च प्रेतास्मि तदुभयमन्तरेणेष्टापूर्तं मे लोके सुकृतमायुः प्रज्ञां वृञ्जीथाः यदि ते द्रुह्येयम् इति"[15]

"राजा वै राजसूयेनेष्ट्वा भवति। सम्राट् वाजपेयेन"[16]

राष्ट्रशासकाय यदा राष्ट्र समर्प्यते तत्र श्रुतिर्वदति राष्ट्रस्य दायित्वं दाढ्य़ुण परिपालय। राष्ट्रमिदं एतेषां कार्याणां कृते दीयते तुभ्यम् -

१. कृषिकर्मणः विकासाय

२. जनानां सम्यक् कल्याणाय

३. अर्थसमृदध्यर्थम्

४. राष्ट्रस्य च समग्र विकासाय

मन्त्रो यथा -

'नमो मात्रे पृथिव्यै नमो मात्रे पृथिव्या इयन्ते राड्यन्तासियमनो ध्रुवोसि धरुणः।

कृष्यत्वा क्षेमायत्वा रय्यैत्वा पोषायत्वा[17]

समासेन मन्त्रस्य कथनं चतुर्भिः शब्दैः राज्ञः सम्पूर्ण कर्त्तव्यं प्रतिपादितम् -

१. कृषिः - कृषि कर्मणा अन्नलाभः प्रजानां पालनञ्च।

२. क्षेमः - लब्धस्य परिपालनं क्षेमः।

३. रयिः - आर्थिक समुन्नतिः राष्ट्रस्य स्वाभिमानं प्रतिष्ठापयति।

४. पोषः - राष्ट्रस्य संरक्षणम्।

महाराजस्य चिन्तनं वर्तते अनादिकालात् राजानः स्वदेशस्य रक्षणं कुर्वन्ति। विशिष्य राजस्थान प्रदेशे अनेके वीराः राजपुत्राः अभूवन् ये राष्ट्ररक्षणार्थं प्राणान् तेजुः।

भगवान् श्री रामानन्दाचार्यः राष्ट्र रक्षणाय एव रामानन्दसंप्रदायस्य प्रचारं कृतवान्। वैराग्यप्राप्तः श्रीरामानन्दः राष्ट्ररागात् विमुक्तो नाभवत्। अनेके धर्माचार्या: राष्ट्रधर्मं सर्वोत्कृष्टं मत्वा स्वमतस्य पोषणं कृतवन्तः।

श्रीनारायणदास महाराजस्य परिकल्पना राष्ट्ररक्षण विषये रामराज्यस्य विभाति। रामराज्ये सर्वे वर्णाः स्वकीयं धर्मं परिपालयन्ति स्म। चौरादीनां भयं नासीत्। आधिव्याधीनां प्रकोपः नैव श्रूयते स्म। तस्मात् सर्वस्वं ईश्वराधीनं मत्वा भजनं कुर्यात् । सज्जनानां विदुषां च सेवा विधेया।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्याञ्जगत् मागृधः कस्यस्विद्धनम् ॥

## नारी शिक्षायै विचारः अवदानश्च

स्त्रीशिक्षा विषये वेदकालादेव महत्वपूर्ण चिन्तनं प्राप्यते। वैदिकवाङ्मये स्त्रीपुरुषयोर्मध्ये भेदो नैवाङ्गीकृतः। कुत्रापि इदं चिन्तनं नास्ति यत् पुरुषः श्रेष्ठो वर्तते। स्त्री न्यूनास्ति अपितु द्वावपि समानौ स्तः। अस्यां सृष्टौ यावानधिकारः पुरुषस्य तावानेव स्त्रियाः अधिकारः मन्यते।

स्त्रियं विना पुरुषः यज्ञाधिकारी नैव भवति अर्थात् सत्कर्मसु स्त्रियाः समर्थनं परमावश्यकम्। वेदमन्त्राणां यथा ऋषयः द्रष्टारः सन्ति तथैव अनेकेषां सूक्तानां द्रष्ट्यः ऋषिकाः सन्ति । प्रायेण (४२२) द्वाविंशत्यधिकचतुः शतमन्त्राणां ऋषिकाः उपलभ्यन्ते तासु काश्चन सुप्रसिद्धाः - इन्द्राणी, शची, अपाला, घोषा काक्षीवती, लोपामुद्रा श्रद्धा, कामायनी, सूर्या, सावित्री, विश्ववारा उर्वशी, अदिति च।

शिक्षा विना ऋषिपदं नैवावाप्यते। किं बहुना शिक्षायाः अधिष्ठात्री साक्षात् सरस्वती विद्यते तस्मात् यजुर्वेदे उक्तं - सरस्वती वयति दर्शतं वपुः। ऋग्वेदस्य कतिपये सूक्ते स्त्रिया: वैशिष्ट्यं स्पष्टतया पठ्यते। वागम्भृणी स्वयमेव वदति अहमेवास्य संसारस्य समग्रं तत्वं वेद्मि। रुद्रादीनामवस्थितिः मां विना नैव सम्भवति। इन्द्रादयोऽपि शक्तिमन्तः सन्ति मत्सहायेनैव। मयि परमोत्कृष्टा शक्तिर्विद्यते यया शक्त्या सकलं चराचरं एककालावच्छेदेनैवाहं ज्ञातुं शक्नोमि।

'अहं रुद्रेभिवंसुभिश्चराम्यहमादित्यैरुतविश्वदेवैः अहं मित्रावरुणावुभौ बिभर्मि अहमीन्द्राग्नी अहमश्विनोभा॥ [18]

स्त्रीपुरुष इव शौर्यगुणसम्पन्ना भवति सर्वत्र पुराणे च स्त्रियाः शौर्यस्य पराक्रमस्य च गाथा उपलभ्यते। सामान्ययुद्धे पुरुषाः अस्त्रशस्त्रादिभिः सज्जिताः भवन्ति किन्तु घोरसंकटे स्त्रियः शस्त्रादिसज्जिताः भूत्वा युद्धकरणार्थं गच्छन्ति। स्त्रीणां बलमैश्वर्यं अतुलमेव मन्यते। घोरसंकटे इत्युक्ते यत्र वेद धर्मस्य हानिः सम्भाव्यते। वेदस्य गौरवरक्षणाय स्त्रियः आजोबलं प्रदर्शयन्ति प्रसिद्धाः असुराश्च ताभिः साकं योद्धंन शक्नुवन्ति। अस्य प्रमाणमपि तत्रैवाह -

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्त वा उ।[19]

अहं सुवे पितरमस्यमूर्धन्मम योनिरप्स्वन्तः समुद्रे॥

स्त्री पराक्रमयुता भवति नास्ति सन्देहलवावसरः। यद्यपि स्त्रियाः शरीरं ममतायाः प्रतिमूर्तिर्भवति। सर्वत्रशास्त्रे मृद्वङ्गीरूपा सा स्मृता। यस्मिन् गात्रे दयायाः, वात्सल्यस्य, करुणायाः, मातृभावस्य च रसः प्रवहति। दुर्गा सप्तशत्यां च एकः श्लोकः तादृशः स्मर्यते -

स्त्रीरत्नमतिचार्वङ्गी द्योतयन्ती दिशस्त्विषा।

सा तु तिष्ठति दैत्येन्द्र तां भवान् द्रष्टुमर्हति ॥ [20]

किन्तु समग्रे साहित्ये इन्द्रादीनां स्त्री च युद्धे निपुणाः दृश्यन्ते। ताः सर्वा अपि स्त्रियः युद्धस्य सकलान् नियमान्, कौशलान् च जानन्ति। तस्मात् दुर्गासप्तशती मध्ये प्रकरणानुरोधेन पृथक्-पृथक् देव्यः असुराणां संहाराय समुत्पन्नाः। समग्रे संस्कृतसाहित्ये युद्धस्य सैद्धान्तिकं निर्वहणं यथा दुर्गासप्तशतीमध्ये पठ्यते नान्यत्र तथा सम्भवति। सामान्येन युद्धस्य नियमः भवति शत्रुपक्षस्य संहारः विनाशश्च किंतु दुर्गासप्तशतीमध्ये यत् युद्धं प्रवर्तितं तस्य वैशिष्ट्यमिदमस्ति प्रकारान्तरेण शत्रूणां कल्याणमेव। सर्वथा संहारभावस्तत्र नाधिगतः उत्कृष्टं उदाहरणं चतुर्थेऽध्याये मिलति यत्र देवैः प्रोक्तम् -

दृष्ट्वैव किं न भवती प्रकरोति भस्म।

सर्वासुरानरिषु यत्प्रहिणोषि शस्त्रम्॥

अयं भावः भगवत्याः पराक्रमः अचिन्त्येऽतुलनीयश्च विभाति दृष्टिमात्रेण सा संहर्तुं क्षमा तद्यथा - "हुंकारेणैव तं भस्म सा चकाराम्बिका ततः" तथापि एकैकस्यासुरस्य संहाराय स शस्त्रं नियोजयति तत्र को हेतुः? इत्यस्योत्तरमन्वेषयन् भगवान् वेदव्यासः प्राह -

लोकान् प्रयान्तु रिपवोऽपिहि शस्त्रपूता।

इत्थं मतिर्भवति तेष्वपि तेऽति साध्वी॥

अयमर्थः शस्त्र प्रहारेण दुष्टानां खलानां खलत्वं विनश्यति। तथा दोष राहताः सर्वे असुराः स्वर्गं गमिष्यन्ति। इदं चिन्तनं कदाचिदपि पुरुषस्य नैव दृश्यते तस्मात् सर्वस्य सारांशः अधस्तनेंऽशे विद्यते -

चित्ते कृपा समरनिष्ठुरता च दृष्टा।

त्वय्येव देवि वरदे भुवनत्रयेऽपि॥ [21]

इतोऽपि वैशिष्ट्यं सप्तशती मध्ये पठितुं शक्यते। भवगती असुराणां संहारात् पूर्वं वैकल्पिकं सुरक्षितं मार्ग प्रस्तावं च दत्तवती तद्यथा -

यूयं गच्छथ पातालं यदि जीवितुमिच्छथ अन्यत्रापि -

त्रैलोक्यमिन्द्रो लभतां देवाः सन्तु हविर्भुजः।

अयमर्थः असुराणां निवासस्थानं भोगस्थानं च पातालं वर्तते। यत्र असुराः सर्वं भोगं कुर्वन्ति। किन्तु लोभात् पाताललोकं त्यक्त्वा देवलोके चागच्छन्ति। देवलोके स्वाध्यायस्य पूजनस्य, तपसः, अनुशासनस्य, मर्यादायाश्च प्राथम्येन पालनं भवति।

तत्रैवासुर लोके स्वच्छन्दवृत्तिः।

स्त्रीशक्ति शाघ्या भवति। तासां सामर्थ्यं तिरस्कर्तुं न कोऽपि प्रभवति । ताः यदिच्छन्ति तदेव भवति तस्मादुक्तम् -

"यं कामये तं तमुग्रं करोमि तं ब्रह्माणं तमृर्षि सुमेधाम्[22]

अर्थात यं परुषमहं इच्छामि तं उत्कृष्टं करोमि जगत्प्रसिद्धं करोमि। सर्वे गणाः तस्मिन पुरुषे स्वभावतो वसन्ति तमेव ब्रह्माणं अर्थात् सर्जकं आविष्कारकं विदधामि किं पुनः तं ऋषि मन्त्रद्रष्टारञ्च करोमि। मेधायुतमपि कर्तुमहं शक्नोमि। अस्य मन्त्रस्यार्थः विज्ञापयति यत् - शिक्षायुता स्त्री एव एतत् कर्तुं शक्नोति। शिक्षया सर्वमागच्छति। अतः स्त्री शिक्षायाः समर्थनं वेदेषु सर्वत्र राराजते।

महाराजः श्रीनारायणदासः स्त्रीशिक्षायाः कृते कृतसंकल्पः प्रतिभाति । महाराजस्य विचारे सर्वाः स्त्रियः भगवत्याः पराम्बायाः मूर्तयोः विद्यन्ते - "स्त्रियः समस्ताः सकला जगत्सु" स्त्रिशिक्षायै महाराजस्य प्रयासः श्लाघनीयो विद्यते। सर्वत्र ग्रामे ग्रामे महाराजः बालिकानां शिक्षायाः कृते योगदानं प्रयच्छति।

महिलामहाविद्यालयस्य निर्माणं कारयित्वा श्रीनारायणदासमहाराजः समाजे शिक्षायाः दीपं प्रजज्वाल।

संस्कृत विश्वविद्यालये बालिकानां छात्रावासे निवासार्थं कोटिरूप्यकानां छात्रावासं निर्मापयामास। किं बहुना निर्धनानां बालिकानां कृते भोजनादिकं शुल्कञ्च महाराजपक्षतः भवति। तासां छात्राणां कृते छात्रावासस्य शुल्क: महाराजपक्षतः आयाति।

महाराजस्य विचारे शिक्षिता स्त्री गृहकार्यं कुर्वन्ती अपि समाश्रितान बन्धुवर्गान् पाठयितुं समर्था।

महाराजस्य मते शिक्षायाः प्रयोजनं केवलं धनोपार्जनं नास्ति अपितु शिक्षा मनुष्यस्य संकीर्णतां नाशयति। व्यपकतां च प्रयच्छति। औदार्यभावस्य संगमः शिक्षया जायते। परिवारस्यैकीकरणं सम्भवति। अनेकाः स्त्रियः शिक्षायाः अभावे नारकीयं जीवनं यापयन्ति। यथा यथा स्त्रीशिक्षायाः प्रचारः वर्धते बालविवाहस्यापाकरणं जायते। जनसंख्यायाः समाधानञ्च शिक्षया संभवति। शिक्षिताः स्त्रियः परिवारस्य कल्याणं कुर्वन्त्यः समाजस्य राष्ट्रस्य च विकासाय सहयोगं ददाति।

शिक्षिता स्त्री शिक्षितं राष्ट्र उन्नतं राष्ट्र समृद्धिमत् राष्ट्रञ्च।

### निबन्धः ग्रन्थ स्फूट विमर्शचः

ब्रह्मानन्दं परं सुखदं केवलं ज्ञानमूर्तिम्।

द्वन्द्वातीतं गगन सदृशं तत्वमस्यादि लक्ष्यम्।

एकं नित्यं विमलमचलं सर्वधीसाक्षीभूतम्।

भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि॥

महाराजः श्री नारायणदासः रामानन्दसम्प्रदायस्य विश्वप्रसिद्धः संरक्षको मन्यते। रामानन्दसंप्रदाये अखिलभारते यत्किमपि सम्प्रति कार्यं भवति सर्वत्र महाराजस्य स्वीकृतिर्भवत्येव। त्रिवेणीधाम्नि महाराजस्य सत्संगः प्रायेण नित्यं चलति। अनेके भक्तगणास्तत्र

आत्मकल्याणार्थमागच्छन्ति। महाराजस्य समग्रं कार्य मेकस्मिन् लघुकायग्रन्थे वर्णयितुं न शक्यते । एकैकस्य कार्यस्य यावत् महत्त्वं विभाति तस्य सम्पूर्ण प्रस्तारः एकस्मिन् विशालकाय ग्रन्थे सम्भवति। सारस्वतं कर्म महाराजस्य प्रमुखं प्रियं च वर्तते। यत्र कुत्रापि सत्संगप्रक्रमे महाराजस्यागमनं भक्तानामनुरोधेन जायते तत्र सर्वत्र श्री महाराजस्य प्रथम जिज्ञासा शिशूनां बालिकानाञ्च शिक्षायाः कृते दृश्यते। महाराजः यथा संस्कृतस्य, वेदस्य च संरक्षकः विद्यते तथैवाधुनिकस्य क्रियाकलापस्यच संरक्षकः। महाराजस्यानुरोधेन अनेकाः आधुनिक संस्थाः राराजन्ते यासु आङ्गलविद्यायाः विज्ञानस्य चाध्ययनं सम्यक्तया दृश्यते। यासु संस्थासु मध्ये भौतिकसंसाधनस्य अभावः श्रूयते शीघ्रमेव संसाधनानां (टेबल, कूर्सी, पंखा, नल) व्यवस्थां कारयन्ति।

महाराजस्य संकल्पवाक्यं वर्तते सारस्वतसपर्यया समाजस्य राष्ट्रस्य च कल्याणमचिरेणैव कालेन स्यात्। पुस्तकानां संरक्षणं संवर्द्धनं च सदा करोति।

यदि कश्चिदपि लेखकः द्रव्याभावात् पुस्तकानां प्रकाशने क्षमो नास्ति महाराजः धनदानेन तेषां पुस्तकानां प्रकाशनं कारयन्ति ।

छात्राणामध्ययनं तपः, इत्यस्य परिपालकः महाराजः।।

त्रिवेणीधामतः श्री महाराजस्य प्रेरणया प्रतिमासं ब्रह्मपीठसन्देश नाम्नी पत्रिका प्रकाश्यते। अस्यां पत्रिकायां २००० ख्रीष्टाब्दात् नैरन्तर्येण महाराजस्य वचनामृतं प्रथमपृष्ठे प्रकाशितं भवति। महाराजस्य सन्देशे वैदिक मन्त्राणां, उपनिषदां, पुराणानां च गभीरं चिन्तनमुपलभ्यते। श्रीनारायणदासमहाराजस्य वचनामृतं एकत्र संकलितं वर्तते। प्रथम वचनामृतं अनुवादं विनैव यथा प्रकाशितं तथैव लिख्यते येन तस्य मौलिकस्वरूपस्य संरक्षणं भवेत् -

साधकानां कृते -

भगवत् कृपा प्राप्त करने वाले साधकों को अपनी दिनचर्या इस प्रकार से बनानी चाहिए कि वह प्रातः काल ब्रह्म मुहूर्त में उठे। वह अपने मन, शरीर और वाणी को संयमित करके अपने मनको नामाक्षरों में लगाए। आधे घंटे तक वाणी से जोर जोर से भगवत् नाम बोलकर संकीर्तन करें। यही भगवान का प्रातः स्मरण होगा। इससे धीरे - धीरे साधक के मन का मैल धुल जाएगा। इसके बाद साधक को चाहिए कि वह अपने इष्टदेव को प्रणाम करते हुए माता पिता का चरण स्पर्श करे तदुपरान्त शौच स्नान से निवृत्त होकर सन्ध्योपासना, अंगन्यास, करन्यास, प्राणायाम, आदि के माध्यम से चित्त को एकाग्र करके श्रद्धेय गुरुदेव द्वारा दी गई राममन्त्र की दीक्षा के अनुरूप मन्त्र का जाप करे। मानसिक पूजा करे। इसके बाद स्वाध्यय के अन्तर्गत रामचरितमानस, भगवद्गीता श्रीमद्भागवत, रामस्तवराज, मूलरामायण, रामसहस्रनाम जिसमें भी मन लगता हो उसी का नियमित रूप से पाठ करे।

जनवरी २००० ई०

महाराजस्य वचनामृतं जनवरी २००० वर्षात् दिसम्बर मासस्य २००८ ख्रीष्टाब्दं यावत् प्रकाशितं सर्वं सज्जीकृत्य इन्दौरनिवासिना श्री नन्दकिशोर नरेड़ा महोदयेन एकस्मिन् अमृतवाणी नामके ग्रन्थे प्रकाशितवान्।

श्रीनरेडा महोदयस्य कथनमस्ति प्रतिवर्षं द्वादशपत्रिकानां द्वादश अंकाः प्रकाश्यन्ते अनेन २००८ यावत् १०८ अंकाः प्रकाशिताः पत्रिकायां यद्वचनामृतं प्रकाशितं न जाने तस्य संरक्षणं कथं स्यात् अत एव ग्रन्थीकृत्य भक्तानां कल्याणाय, जिज्ञासा शमनाय, समस्यानां अध्यात्मसमाधानाय. ज्ञानिनां ज्ञानवर्धनाय उपासकानां मनः शान्तये, च ग्रन्थः प्रकाशितः।

ग्रन्थस्य कलेवरं दिव्यपुरुषाणां छायाचित्रेण समलंकतम। मध्ये मध्ये महाराजस्य भावयुतं बहुविध चित्रं ग्रन्थस्य गौरवं वर्धापयति। पस्तकेऽस्मिन १६३ पृष्ठानि सन्ति।

अस्य ग्रन्थस्याध्ययनमवश्यमेव भक्तानां भवरोगं नाशयिष्यति।

महाराजस्य प्रेरणया त्रिवेणीधाम्नः विरक्तः शिष्यः श्री रामरिछपालदासमहाराजः श्री पूर्वाचार्य चरितामृतम् ग्रन्थं प्रकाशयामास । अस्मिन् ग्रन्थे रामानन्दसंप्रदाये प्रसिद्धानां पुरुषाणां आत्मसिद्धानां जीवानामृतं ग्रन्थीकृतम्।

त्रिवेणीधाम्नि विग्रहस्य या पूजा पद्धति वर्तते महाराजस्य प्रेरणया तत्रत्यः विरक्तः शिष्यः पद्धतिं प्रकाशयामास। रामानन्द संप्रदाये श्रीरामचरितमानसस्य प्रतिष्ठा वरिवर्ती। रामानन्दसंप्रदाये विश्वासः वर्तते रामचरितमानसस्य चौपाई, दोहा च मन्त्रसदृशः विद्यते। अतएव केषाञ्चित् सिद्धानां मन्त्रसदृशानां चौपाई इत्याख्यानां संग्रहः इच्छापूर्ति नामके लघुकायग्रन्थे वर्तते।

### उपदेशः

श्रीनारायणदासमहाराजः सरलभाषायां जनान् सदा प्रबोधयति। ग्राम्याश जनाः महाराजानां वचनं श्रुत्वा उपदेशस्य पालनं कुर्वन्ति। सदा आचारवता भाव्यम्।

सत्संगतिः कथय किं न करोति पुंसाम्। सज्जनानां संग: दुजनानाञ्च त्यागः विधेयः।

नाममन्त्रस्य जपः कार्यः।

मन्त्रजपात् दुर्गतिः विनश्यति।

नाम संकीर्तनं उच्चस्वरेण कर्त्तव्यम्।

देवादीनां दर्शनं प्रतिदिनं विधेयम्।

मातृदेवो भवः, पितृदेवो भव, आचार्य देवो भव, इत्यादिवाक्यानामनुसरणं विधेयम्।

दानं दुर्गति नाशनम् इत्यस्य पालनं कर्त्तव्यम्।

विद्याविनय सम्पन्नानामादरो विधेयः।

महात्मनां, वैष्णवानाञ्च सेवा कर्तव्याः।

त्रिविधिं नरकस्येदं द्वारं नाशनमात्मनः।

कामं क्रोधं तथा लोभं तस्मादेतत्त्रयं त्यजेत् ॥

बालवृद्धातुराणाञ्च यथासामर्थ्यं साहाय्यं कर्त्तव्यम्।

मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।

आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।

'स्तेनं, मद्यपानं च कदाचिदपि न कर्त्तव्यम्। महाराजस्य वचनं एकत्र हिन्दीभाषायां यथा संकलितमस्ति तथैवोदाहरिष्ये -

"साधु तो वही है जिसके मन वचन कर्म में मानवीय या दैवीय श्रेष्ठ गुणों का समावेश है। जो सात्विक स्वभाव एवं गुण वृत्ति वाला हो त्याग एवं तपस्या के मार्ग पर चलने वाला हो जो परोपकारिता उदारता, सहिष्णुता, सहानुभूति के गुणों से संयुक्त हो, वाणी में मधुरता सत्यता, स्पष्टवादिता हो, कर्म में कुशलता दृढता निर्भीकता, यशस्विता, ज्ञानसम्पन्नता, इन्द्रिय नियन्त्रता, धैर्यशालीनता, सहृदयता, कर्त्तव्यपरायणता, सेवा, श्रद्धा, आस्था, निष्ठा विश्वासधारिता, विनयता, सदाचारिता, भक्तिधारणा, सद्भावना, निष्पक्षता, वत्सलता नैतिकता, बुद्धिमत्ता एवं मुखमण्डल पर तेजस्विता तथा ओजस्विता झलकती हो। वस्तुतः साधुता भारतीयों का जीवन दर्शन है उनकी संस्कृति है और कार्यपद्धति है।[23]

रामानन्दसंप्रदाये भजनस्य सर्वोत्कृष्टं स्थानं विद्यते। भजनप्रभावात् श्रीहनुमान् रामचन्द्रस्य प्रियः सखाऽभवत्। भजन प्रभावात् काकभुसुण्डी महाराजः कल्पान्तं यावत् जीवनमवाप। महाराजस्य सर्वेभ्यः साक्षादुपदेशो भवति प्रातः काले ब्राह्म मुहूर्ते उत्थाय उच्चस्वरेण शय्यास्थ एव श्री रामस्य नामोच्चारणं

कुर्यात् सकलं जागतिकमपि कार्यं परमेश्वरस्य प्रीत्यर्थ सम्पादयेत्। भोजनं हरये निवेद्य कुर्यात्। भोजने तुलसीदलमवश्यमेव दद्यात्। भगवतः चरणोदकं सावधानेन पिबेत्।

तीर्थयात्रायां गत्वा स्नान, दानञ्चावश्यं विधयेम्।

असत्यं कदापि न ब्रूयात्। सत्यमेव वेदत्।

धार्मिकग्रन्थस्य पारायणं कर्त्तव्यम्। गोसेवा विधेया। पशुपक्षीभ्यः जलदानं, अन्नदानञ्च कर्त्तव्यम्।

अष्टादश पुराणेषु व्यासस्य वचनद्वयम्।

परोपकाराय पुण्याय पापाय परपीडनम्॥

महाराजस्य चरमोपदेशः भवति -

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।

सर्वे भद्राणि पश्यन्तु मा कश्चिदुःखभाग्भवेत्॥

धर्मो जयतु। अधर्मो नश्यतु। प्राणिनां मध्ये सद्भावः भवेत्। विश्वस्य कल्याणं भवेत्। सुस्थिरं रामराज्यं भवेत्।

गावों विश्वस्य मातरः।

ॐ शान्तिः शान्तिः शान्तिः।

### वैभवं चमत्कारश्च

श्रीनारायणदासमहाराजः सिद्धसंकल्पो वर्तते। महाराजस्य मनसि यः विचारः आगच्छति तस्य पूर्तिरवश्यमेव भवति। कामं तत् कार्यं कोटिरूप्यकानां भवेत् अथवा जनसहयोगानां। इच्छामात्रेण कार्यं सिद्ध्यति।

राजस्थाने मरूभूमौ जलस्याभावः दृश्यते किन्तु अनेके भक्ताः महाराजस्य आशीर्वचनं प्राप्य क्षेत्रमध्ये कूपोदकं प्राप्नुवन्ति।

महाराजस्यापरं चमत्कारः विद्यते यदि ग्राम्याः महाराजस्यागमनं शृण्वन्ति स्याभ राजस्य सहस्रशो जनाः श्रवणमात्रेनैव दर्शनार्थमागच्छन्ति उत्सवेषु त्रिवेणीधाम्नि असंख्याताः भक्तगणाः आगच्छन्ति किन्तु सर्वेभ्यः भोजनादिकं स्वत एव उपलभ्यन्ते।

सत्यसंकल्पस्य कृते संसारे किञ्चिदपि असम्भवं नास्ति। यतोहि शास्त्रं ब्रुते -

'ऋषीणां पुनराद्यानां वाचमर्थोनुधावतिं"

महाराजस्य आशीषा अनेके जनाः रोगमुक्ताः जाताः।

अनेके सन्ततिं लब्धवन्तः। महाराजस्य पार्वे सर्वमसम्भवं सम्भवं भवति। चमत्कारः भजनप्रभावात् दैवी संपद्रूपेण समागच्छति। जपप्रभावात् अध्यात्म भावस्योन्नतिः जायते। शनैः शनैः कालविभागः विलीयते। त्रैकालिकमपि सत्यं स जनः एककालावच्छेदेन साक्षात्कारं करोति उक्तञ्च रामचरितमानसे -

जपत पवनसुत पावन नामू।

अपने वस कर राखे रामू।।

अयं भावः जपबलात् श्री हनुमान् जगत्पतिं श्रीरामं वशीभूतमकरोत्। श्रीमहाराजस्य साक्षात्कारोऽपि तादृश एव प्रतीयते। परमकारुणिकः श्री नारायणदास महाराजः सदा ग्राम्यानां जनानां हितसाधनाय प्रयासं करोति। ग्राम्या अपि सर्वाः समस्याः तत्रैव निवेदयन्ति।

ग्राम्यानां कथनं वर्तते महाराजः चमत्कारं नैव प्रदर्शयति किन्तु धार्मिकोपायेन समस्यानां समाधानं विदधाति। कदाचित् हनुमतः उपासनां उपदिशति। पूर्वाचार्याणां समाधि स्थलस्य परिक्रमणं बोधयति। प्रचलितः उपचारस्तत्र दृश्यते पूर्वाचार्याणां समाधिस्थलस्य परिक्रमणं कर्त्तव्यम्। परिक्रमणं कियत्वारं भवेत् महाराजः स्वयमेव व्यक्तिभेदेनादिशति। मन्ये महाराजस्य पार्वे सर्वासां समस्यानां निदानं अध्यात्मरीत्या भवति।

### गीतिः गाथाकथानकश्च विषये प्रचलिताः प्रामाणिकी

महाराजस्यानेके भक्ताः लेखकाः गायकाः संगीतज्ञाश्च सन्ति। पत्र तत्र सभायां गायकः महाराजस्य जीवनवत्तं गायनमाध्यमेन प्रस्तौति। अनक लोककथावाचकाः महाराजस्य कथां श्रावयन्ति। महाराजस्य जन्मावसरे किं शुभं कार्यमभूत् तत् सर्वं विस्तरेण लोकानां

श्रद्धावर्द्धनाय गायन्ति। अनेके विद्वांसः संस्कृतभाषायां, लोकभाषायां च महाराजस्य चालीसा, गुरुवन्दना, नीराजनं च स्फुटं यत्र तत्र प्राप्यते। बहुत्र केसेट मध्ये लोककलाकाराणां गानं प्राप्यते।

महाराजस्य जीवनं समुपलब्धिश्च मेरुसमं वर्तते। प्रायेण राजस्थान प्रान्ते गेहे गेहे महाराजस्य चित्रपटुं प्राप्यते। भक्ताः श्रद्धया दर्शनं कृत्वाभिलषितं कामं समर्धयन्ति।

**ग्रन्थसारः**

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षमिर्यजत्राः।

स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः॥

षड्भिरध्यायैः यथाज्ञानं महाराजस्येतिवृत्तं शोधप्रबन्धेऽस्मिन् संकलितम्। यद्यपि शोधकार्यस्य नियमः भवति तटस्थ भावेन सत्यस्यान्वेषणम्। बहुप्रयासेन च तथ्यस्यावगाहनम्। किन्तु प्रकृतशोध प्रबन्धस्य विवेच्यविषयः अस्माकं समक्षे विद्यते। पूर्णप्रयासेन यथाज्ञानं यथार्थस्य चिन्तनं विहितं तथापि अनेकत्र श्रद्धातिशयात् जनानां वच एव प्रमाणमभूत्। साधोः जीवनं सामान्यानां कृते रहस्यमेव ज्ञायते । साधूनां सम्पूर्ण कृत्यं भगवत् प्रीत्यर्थं सम्पद्यते गौणरीत्या लोकैः सह व्यवहारः लोकरञ्जनार्थमेव। हनुमत् चरित्रं पठ्यते चेत् हनुमतः व्यक्तित्वं अस्माकं समक्षे आयाति। हनुमति एते गुणाः वर्तन्ते किन्तु स्वयमेव हनुमान् ब्रूते "दासोऽहं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः"।

हनुमतः परिचय एव रामदूतत्वेन प्रसिद्धः। तद्वदेव महात्मनां जीवनं लोके प्रसरति। व्यवहारः सामाजिकैः साकं किन्तु लक्ष्यं परमात्मनि विलीनम्। सामान्येन शिक्षायाः तावान् विस्तारः महात्मसु नैव प्राप्यते परन्तु शास्त्रस्य परमार्थज्ञानं तत्र दृश्यते।

शास्त्रनिपुणः पण्डितः रावणोऽपि हनुमतः वैशिष्ट्यं अध्यात्मशक्तिं न विवेद। रावणः हनुमन्तं दृष्ट्वाऽकथयत् अयं साधारणः कश्चित् कपिः विभाति

अस्य वधः कर्तव्यः रावणः सांसारिकं व्यवहारमाकलय्य एतत् सर्वं कृतवान्। रावणस्यानुजः विभीषणः तत्वज्ञः आसीत् परमार्थज्ञानं सम्पन्नोऽसौ हनुमतः सकलं तत्वं ज्ञातवान्। कथनस्य तथ्यमिदं वर्तते साधूनां चरितं महत्। कश्चित् तथाविधः अध्यात्मपुङ्गव एव महात्मनां तत्वं जानाति।

गीतायामर्जुनोऽपि प्रोवाच -

अजानता महिमानन्तवेदं मया प्रमादात् प्रणयेन वापि।

सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ॥

अयं भावः महाराजस्य सहजं सरलं व्यक्तित्वं च दृष्ट्वा सामान्यजनः विशिष्यमादृशः परमार्थज्ञानं न वेति।

तथापि भगवदनुग्रहेण अनन्तानन्त ब्रह्माण्ड नायकस्य परमात्मपुरुषस्य भगवतः श्रीरामस्य दासानुदासस्य स्वनाम धन्यस्यानन्त श्री विभूषितस्य नारायणदासमहाराजस्य व्यक्तित्वं प्रदर्शितवान्। अत्र कियान् दोषः कश्च गुण: नाहं जाने।

ॐ श्री जानकीवल्लभो विजयते।

श्री सीतारामाभ्यानमः।

श्री हनुमते नमः।

श्री राम जयराम जय जय राम।

वेदपुरुषाय नमः।

**सन्दर्भग्रन्थाः -**


1. ऋग्वेद संहिता
2. यजुर्वेद संहिता
3. सामवेद संहिता
4. अथर्ववेद संहिता
5. ऋग्वेद सायणभाष्यम्
6. ऋग्वेद सातवलेकर भाष्यम्
7. यजुर्वेद महीधर उध्वटभाष्यम्
8. यजुर्वेदसंहिता डॉ० विद्येश्वर झा
9. वैदिकवाङ्मयस्येतिहासः - डॉ.शम्भु कुमार झा
10. ऐतरेय ब्राह्मणम्
11. शतपथब्राह्मणम् – सायणभाष्यम्
12. शतपथब्राह्मणम् – प्रो० युगलकिशोरमिश्र
13. गोपथ ब्राह्मणम्
14. एतरेयारण्यकम्
15. बृहदारण्यकोपनिषद् – शंकरभाष्यम्
16. बृहदारण्यकोपनिषद्
17. अष्टोत्तरशत् – उपनिषद् संग्रहः - राष्ट्रियसंस्कृतसंस्थानम्
18. स्वामीरामानन्द के शिष्य और उपलब्धि - डॉ० सुधाकर पाण्डेय

19. विशिष्टाद्वैत सिद्धान्तः - डॉ० स्वामी राघवाचार्य वेदान्ती

20. श्रीमद्वाल्मीकीय रामायणम् – गीताप्रेस गोरखपुर

21. पूर्वाचार्य चरितामृतम् - स्वामी रामरिछपालदास, त्रिवेणीधाम, जयपुर

22. अमृतवाणी - पं० नन्दकिशोर नरेडा

23. त्रिवेणीधाम का संक्षिप्त इतिहास - पं० रामस्वरूप दोतोलिया।

24. भ्रान्तिगिरिभंगः - डॉ० सियाराम दास नैयायिक

25. अर्थसंग्रहः - प्रो० वाचस्पति उपाध्याय

26. निरुक्तम्

27. पाणिनीयाष्टाध्यायी २८. सिद्धान्तकौमुदी

28. श्रीरामचरितमानस

29. मानस शंका समाधान

30. आह्निक सूत्रावल्ली

31. मन्त्र और मातृकाओं का रहस्य

32. विष्णुसहस्रनाम स्तोत्र

33. ललितासहस्रनाम - सौभाग्यभास्करव्याख्या

34. धर्मशास्त्र का इतिहास - पी०वी० काणे

35. कात्यायन श्रौतसूत्रम्

36. सांख्य कारिका - प्रो० देवेन्द्रनाथ पाण्डेय

37. लघुसिद्धान्त कौमुदी - भैमीव्याख्या

38. सर्वानुक्रमणी - डॉ० नानावटी

39. श्रीमद्भगवद्गीता

40. दोहावली

41. भागवतसमुदाय - डॉ० बलदेव उपाध्याय, नागरीप्रचारिणी सभा

42. ग्रंथसाहब - तरणताल संस्करण

43. भक्तमाल - नाभादास, रूपकलाजी संस्करण

44. उत्तरी भारत की सन्तपरम्परा

45. जनपदीय सन्त और उनकी वाणी - मूमल प्रकाशन, जैसलमेर

46. कबीरग्रन्थावली – हिन्दी परिषद् – प्रयाग विश्वविद्यालय

47. भक्तमाल - रामकुमार दास

48. एस०आर० भट्ट - स्टडीज इन रामानुज वेदान्त

49. वी०कुमारप्पा - दि हिंदु कनसेप्शन ऑफ डेटी

50. के०सी० वर्दाचारी - रामानुजाज थ्योरी ऑफ नॉलेज

51. डॉ० जे०एन० फर्कुहर - दि हिस्टारिकल पोजीशन ऑफ रामानन्द

52. बीजक

53. कबीर एण्ड हिज फोलोवर्स - डॉ० एफ० ई० के०

54. हिन्दी साहित्य की भूमिका - डॉ० हजारी प्रसाद द्विवेदी

55. हिन्दी काव्य की निर्गुणधारा में भक्ति - डॉ० श्याम सुन्दर शुक्ल

56. पदावली - अग्रदास (अग्र ग्रन्थावली)

57. ध्यानमंजरी

58. कवितावली

59. विनय पत्रिका – तुलसीदास गोस्वामी

60. गीतावली - तुलसीदास गोस्वामी

61. वैष्णववमताब्जभास्कर - स्वामी रामानन्द

62. रामार्चन पद्धति - स्वामी रामानन्द

63. आनन्द भाष्य - सम्पादक – रघुवरदास वेदान्ती

64. वैष्णवमताब्जभास्कर - सं० रामटहल दास

65. वैष्णवमताजभास्कर - सं० भगवदाचार्य

66. वैदिकसाहित्य और संस्कृति – बलदेव उपाध्याय

67. हिस्ट्री ऑफ इन्डियन लिटरेचर - विंटर नित्स

68. भविष्यपुराणम्

69. श्रीमद्देवीभागवतम्

70. श्रीमद् भागवतमहापुराणम्

71. आह्निक सुत्रावली - चौखम्बा विद्याभवन वाराणसी

72. बृहद्देवता - रामकुमार राय

73. पुराणदर्शन समग्रदृष्टि - पं० अनन्त शर्मा

74. शंकासमाधान - स्वामी अडगडानन्द जी

75. वैदिक साहित्य का इतिहास - श्री गजानन्दशास्त्री मुसल

76. रामरक्षा - स्वामी रामानन्द

77. संस्कृत साहित्य का इतिहास - ए०वी० कीथ

78. नारद भक्तिसूत्र

79. शाण्डिल्य भक्तिसूत्र

80. ब्रह्माण्डपुराणम्

81. संस्कृत हिन्दीकोष - वामनशिवराम आप्टे

82. अभिधान राजेन्द्र

83. अमरकोष - रामाश्रमी

84. शब्दस्तोमनिधि

85. वाचस्पत्यम्

86. षड्दर्शनसमुच्चय - हरिभद्रसूरि

87. सर्वदर्शन संग्रहः - प्रो० उमाशंकर शर्मा ऋषि

88. दर्शनदिग्दर्शन आचार्यनरेन्द्रदेव - राहुलसांकृत्यायाः

89. बौद्ध धर्म दर्शन - भरतसिंह उपाध्याय

90. बौद्धदर्शनतन्या - अन्यत्रभारतीयदर्शन - डॉ० देवराज

91. ब्रह्मसूत्रम् - शांकरभाष्यम्

92. मन्त्रमहोदधि – महीधर

93. अष्टछाप और वल्लभ संप्रदाय - डॉ० दीनदयाल गुप्त

94. भारतीयसंस्कृति और साधना - गोपीनाथ कविराज पत्रिका

95. कल्याण के विविध अंक

96. वयम् - ज०रा०राज०सं०वि०वि० जयपुर

97. ब्रह्मपीठ सन्देश - त्रिवेणीधाम (जयपुर)

98. भारती - जयपुर

99. स्वरमंगला - राजस्थानसंस्कृत अकादमी (जयपुर)

100. दिव्यज्योति - शिमला

101. विश्वज्योति - होशियारपुर

सन्दर्भग्रन्थाः –


1. ऋग्वेद १० १२-९०/
2. तैत्तिरीय संहिता ४.१.१.७ -
3. श्रीमद्भगवद्गीता १३-४ -
4. श्रीमद्भगवद्गीता ४१.१८ -
5. श्रीमद्भगवद्गीता ४२ तः ४४ श्लोकाः - १८ -
6. 'महाभारतवनपर्व १८० २० तः २६ श्लोकाः।.
7. महाभारत वनपर्व ३१३ १०८/
8. 'शुक्लयजुर्वेदः ९ ३३.
9. शुक्लयजुर्वेद १० २.
10. अधर्ववेदः १९ ३.३०.
11. अथर्ववेदः १९ ९.१.
12. यजुर्वेदः १० ४.
13. यजुर्वेदः २२ २२.
14. अथर्ववेदः १९ ९.४९.
15. 'ऐतरेयब्राह्मणम् १५.८ -
16. शतपथब्राह्मणम् १३.१.१.५ –
17. शुक्लयजुर्वेदः - ९.२२
18. ऋग्वेदः वाक्सूक्तम् १
19. ऋग्वेदः वाक्सूक्तम्

20. दुर्गासप्तशती अध्याय ०५

21. दुर्गासप्तशती अध्यायः ४

22. ऋग्वेद वाक्सूक्तम्

23. श्रीमुख की अमृतवाणी पृष्ठ ११० -